"शिवमल्ली पाशुपत एकाष्ठीलो बुको वसुः ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥ )

वसुः, स्त्री, ( वस् + उः । ) दीप्तिः । वृद्ध्यौषधम् । इति शब्दरत्नावली ॥ ( दक्षस्य कन्याविशेषः । सा तु धर्म्मस्य पत्नीनामन्यतमा । इति विष्णुपुराणम् । १ । १५ । १०५ ॥ )

वसुः, त्रि, (वस् + उः । ) मधुरम् । शुष्कम् । इति हेमचन्द्रः ॥

वसुकं, क्ली, ( वसुवत् कायतीति । कै + कः । ) साम्भरिलवणम् । इत्यमरः ॥ पांशवम् । वास्तूकम् । इति राजनिर्घण्टः ॥

वसुकः, पुं, ( वसुः सूर्य्यस्तन्नाम्ना कायतीति । कै + आतोऽनुपेति कः ।) अर्कवृक्षः । इत्यमरः ॥ शिवमल्ली । इति मेदिनी ।के,१५२ ॥ पुष्पविशेषः । स तु श्वेतरक्तभेदेन द्विविधः । तत्पर्य्यायः । वसुः २ शैवः ३ वकः ४ शिवमल्लिका ५ पाशुपतः ६ शिवमतः ७ सुरेष्टः ८ शिवशेखरः ९ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । पाके शीतत्वम् । दीपनत्वम् । अजीर्णवातगुल्मनाशित्वम् । श्वेतस्य रसायनत्वञ्च । इति राजनिर्घण्टः ॥ ( अस्य पर्य्यायान्तरं यथा,—
"वकपुष्पः काकशीर्षः स्थूलपुष्पः शिवप्रियः ।
वसुकः काकनामा च वसुहट्टः खपूरकः ॥"
इति वैद्यकरत्नमालायाम् ॥ )

वसुकीटः, पुं, ( वसुनि धने कीट इव प्रार्थकत्वात् । ) याचकः । इति हारावली । ३८ ॥

वसुच्छिद्रा, स्त्री, महामेदाद्रव्यः । इति रत्नमाला राजनिर्घण्टश्च ॥ ( तथास्याः पर्य्यायो यथा,—
"महामेदा वसुच्छिद्रा त्रिदन्ती देवतामणिः ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥ )

वसुदः, पुं, ( वसूनि ददातीति । दा + कः । ) कुवेरः । इति धनदशब्ददर्शनात् ॥ ( यथा, हरिवंशे । ८१ । १५ ।
"सनन्दगोपस्य गृहं वासाय वसुदोपमः ।
अवतीर्य्य ततो यानात् प्रविवेश महाबलः ॥"* ॥
वसु धनं ददातीति । विष्णुः । यथा, महाभारते । १३ । १४९ । ४२ ।
"सुमुखो दुर्जरो वाग्मी महेन्द्रो वसुदो वसुः ॥")
धनदातरि, त्रि ॥ ( यथा, महाभारते । १२ । १२० । ३० ।
"अमोघक्रोधहर्षस्य स्वयंकृत्यान्ववेक्षितुः ।
आत्मप्रत्ययकोषस्य वसुदैव वसुन्धरा ॥" )

वसुदेवः, पुं, ( वसुना धनेन दीव्यतीति । दिव् + अच् । ) श्रीकृष्णजनकः । तत्पर्य्यायः । आनकदुन्दुभिः २ । इत्यमरः ॥ शूरः ३ कृष्णपिता ४ । इति शब्दरत्नावली ॥ अस्य विवरणं यथा,—
नारायण उवाच ।
"कश्यपो वसुदेवश्च देवमाता च देवकी ।
पूर्ब्बपुण्यफलेनैव संप्राप श्रीहरिं सुतम् ॥
देवमीढाम्मारिषायां वसुदेवो महानभूत् ।
आनकाश्च महाहृष्टाः श्रीहरेर्ज्जन्मकाले तम् ।
सन्तः पुरातनास्तेन वदन्त्यानकदुन्दुभिम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ७ अध्यायः वह्निपुराणञ्च ॥ ( स्वनामख्यातः कलियुगराजविशेषस्य देवभूतेरमात्यः । स तु देवभूतिं निहत्य स्वयं राज्यञ्चकार । यथा, भागवते । १२ । १ । १८ ।
"शुङ्गं हत्वा देवभूतिं कण्वोऽमात्यस्तु कामिनम् ।
स्वयं करिष्यते राज्यं वसुदेवो महामतिः ॥"
वसवो देवता यस्य । धनिष्ठानक्षत्रे, क्ली । यथा, वराहसंहितायाम् । ७ । ११ ।
"घोरा श्रवणत्वाष्ट्रं वसुदेवं वारुणञ्चैव ॥" )

वसुदेवता, स्त्री, ( वसवो देवता यस्याः । ) धनिष्ठानक्षत्रम् । इति हेमचन्द्रः । २ । २८ ॥ ( यथा, हरिवंशे । १२२ । ३५ ।
"देवपत्न्यस्तथैवान्या देवाश्च वसुदेवता ॥" )

वसुदेवभूः, पुं, (वसुदेवात् भवतीति । भू + क्विप् ।) श्रीकृष्णः । इति हेमचन्द्रः । ३ । ३६१ ॥

वसुधा, स्त्री, ( वसूनि रत्नानि दधाति धारयतीति । धा + कः । सुवर्णादीनामाकरत्वात् तथात्वम् । ) पृथिवी । इत्यमरः ॥ ( यथा, साहित्यदर्पणे १० परिच्छेदे ।
"राज्ये सारं वसुधा वसुधायां पुरं पुरे सौधम् ।
सौधे तल्पं तल्पे वराङ्गना सर्व्वस्वम् ॥"* ॥
वसुधनं दधाति दत्ते इति । धा + क्विप् । धनदातरि, त्रि । यथा, वाजसनेयसंहितायाम् । २७ । १५ ।
"वसुश्चेतिष्ठो वसुधातमश्च ॥"
"वसुधातमः वसूनां धनानां दातृतमः । क्विबन्तात् तमप् ।" इति तद्भाष्ये महीधरः ॥ )

वसुधाखर्ज्जूरिका, स्त्री, ( वसुधाजाता खर्ज्जूरिका । ) भूखर्ज्जूरिका । इति राजनिर्घण्टः ॥

वसुधारा, स्त्री, ( वसुवत् रत्नस्येव धारा यस्मो यस्याः ।) जिनशक्तिविशेषः । तत्पर्य्यायः । तारा २ महाश्रीः ३ ओङ्कारा ४ स्वाहा ५ श्रीः ६ मनोरमा ७ तारिणी ८ जया ९ अनन्ता १० शिवा ११ लोकेश्वरा १२ आत्मजा १३ खदूरवासिनी १४ भद्रा १५ वैश्या १६ नीलसरस्वती १७ शङ्खिनी १८ महातारा १९ धनंददा २० त्रिलोचना २१ अलोचना १२ । इति हेमचन्द्रः ॥ ( वसूनां रत्नानां धारा सन्ततिर्यत्र । ) कुवेरपुरी । इति शब्दमाला ॥ ( तीर्थविशेषः । यथा, महाभारते । ३ । ८२ । ७२ ।
"ततो गच्छेत धर्म्मज्ञ ! वसुधारामभिष्टुताम् ।
गमनादेव तस्यां हि हयमेधमवाप्नुयात् ॥"* ॥
वसोर्च्चेदिराजस्य प्रिया धारा । यद्वा,—
"वसु द्रव्यं घृतमाज्यमहृतं हविकामिकम् ।
तस्य धारा सदा देया वसोर्धारा हि सा मता ॥"
इति देवीपुराणोक्तवचनात् वसुनो घृतस्य धारा । ) वृद्धिश्राद्धपूर्ब्बकर्त्तव्यवेदिराणवस्थेष्टकक्रुष्यलग्नघृतधारा । यथा । छन्दोगपरिशिष्टे कात्यायनः ।
"कुड्यलग्नां वसोर्धारां सप्तवारान् घृतेन तु ।
कारयेत् पञ्चवारान् वा नातिनीचां न चोच्छ्रिताम् ॥
आयुष्मानिति शान्त्यर्थं जप्त्वा तत्र समाहितः ।
षड्भ्यः पितृभ्यस्तदनु श्राद्धदानमुपक्रमेत् ॥"
वसोर्च्चेदिराजस्य वसोर्धारामिति वसोर्धाराभिपातैरित्यादिदर्शनात् अलुक्समासेनैव प्रयोगः कर्त्तव्यः । इति श्राद्धतत्त्वम् ॥ * ॥ सामगानां तत्पातनमन्त्रो यथा,—
"यद्वर्चो हिरण्यस्य यद्वा वर्चो गवामुत ।
सत्यस्य ब्रह्मणो वर्च्चस्तेन मां संसृजामसि ॥"
यजुषां यथा । "वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारं देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्वा कामधुक्ष्व ।" इति श्राद्धप्रयोगतत्त्वम् ॥ * ॥ ऋग्वेदिनां यथा ।
"अपश्चर आगच्छन्ती भूरिधारे पयस्वती घृतप्रघाते सुकृते शुचिव्रते । राजन्त यस्य भुवनस्य रोदसी अस्य रेत सिक्तं यज्ञधृतम् । १ ।
अम्मा इव वद्धतमे तवासुक्तना अभिचाकशीमि । यत्र सोमः सूयते यत्र यज्ञो घटते घृतस्य धारा मधुमत् पवन्ते ॥ २ ॥
घृतवती भुवनानामभिश्रियोर्व्वी पृथ्वी मधुदुघे सुपेशसा द्यावा पृथिवी वरुणस्य धर्म्मणा विष्कभिते अजरे भूरि रेतसा ॥ ३ ॥
शतधारसुतसमीचमानं विपश्चितं पितरं वक्थानां अभिमदन्त पित्रोरुपस्थेतं रोदसी पिपृतं सत्यवाचम् ॥ ४ ॥
शतधारं वायुमर्कं स्वर्विदं नृचक्षुषस्तेऽभिचक्षते हविः । ये च पृणन्ति प्रयच्छन्ति सङ्गमेति दुदुह्रे सप्तधारम् ॥ ५ ॥
वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारं देवस्त्वा सविता पुनातु । वसोः पवित्रेण शतधारेण सुप्वा कामधुक्ष्व ॥ ६ ॥
मूर्द्धानन्दिवोरतिं पृथिव्या वैश्वानर मृत आजातमग्निं कविं सम्राजमतिथिं जनानामासन्नाः पात्रं जनयन्त देवाः स्वाहा ॥ ७ ॥
इत्येतैर्मन्त्रैः सप्तघृतधारा दद्यात् । इति कालेसिः ॥ * ॥ विशेषवसुधारा यथा,—
"न्यूना या वहते धारा मानात् सर्पिषं सा शुभा ।
नाधिका शस्यते विप्र दुर्भिक्षकलिकारिका ॥
शुष्यते वहमाना या शमते च हुताशनम् ।
सवर्णा हेमवर्णा च धारा राज्यविवृद्धये ॥
सन्तता पतते या तु तनोतीव च पावकम् ।
तनोति नृपराष्ट्रञ्च वसोर्धारा न संशयः ॥
सुगन्धि स्वच्छविमलं क्रमिकीटविवर्ज्जितम् ।
शस्यते च वसोर्धारा या सर्पिर्गन्धपूजिता ॥
अभावात् गवलाज्यं वा चौतयज्ञ सुशोभनम् ।
घृतरौद्रपयोधारा सर्व्वपीड़ानिवारिणी ।
वसु द्रव्यं घृतमाज्यमहृतं हविकामिकम् ।
तस्य धारा सदा देया वसोर्धारा हि सा मता ॥